# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| कक्षा-शास्त्रिद्वितीयवर्षम्(SEM- 4) | **प्रश्नपत्रम् – ६ (Old)** | गुणा: - ७० |
|---|---|---|
| विषय: - नव्यव्याकरणम् | **कोड – CC.2.4.8** | समय: - ३:०० त: ६:०० |
| दिनाङ्क: -०४ ०४-२०१९ | सन्दर्भग्रन्थः – प्रौढमनोरमा, वैयाकरणसिद्धान्तकौमुदी | | |

..........................................................................................................

**प्रथमान्विति:**

**प्रश्न:-१ निम्नलिखितेषु द्वयो: प्रश्नयोरुत्तरं लेखनीयम् | (१०)**

(१) अर्हेण इत्यस्य सिद्धौ हयवरट्-सूत्रे हकारग्रहणाभावे का बाधा उत्पद्यते इति विवेचनीयम् |

(२) "हल्" सूत्रे हकारग्रहणं किमर्थम् इति सोदाहरणं प्रतिपादनीयम् |

(३) तुल्यास्यप्रयत्नं सवर्णम् इत्यत्र 'आस्य' शब्दस्य अर्थं मनोरमादिशा स्पष्टयत |

प्रश्न:-२ "आदिरन्त्येन सहेता", "हलन्त्यम्" चेति सूत्रयो: अन्योन्याश्रयदोष: कथम् आयाति इति विवेचनीयम् | (१०)

**अथवा**

"नाज्झलौ" इत्यत्र आकारसहित: अच् इत्येवं विग्रहस्य प्रयोजनं स्पष्टयत |

**द्वितीयान्विति:**

**प्रश्न:-३ कयोश्चित् द्वयो: सूत्रयो: प्रौढमनोरमादिशा व्याख्या कार्या | (१०)**

(१) इको गुणवृद्धी |

(२) आदिरन्त्येन सहेता |

(३) तस्मिन्निति निर्दिष्टे पूर्वस्य |

**प्रश्न:-४ 'अकृतव्यूहा: पाणिनीया:' इत्येतां परिभाषां विस्तरेण विवेचयत | (१०)**

**अथवा**

"अनेकाल्शित् सर्वस्य" प्राचां मतखण्डनपूर्वकं मनोरमादिशा अर्थं स्पष्टयत |

**तृतीयान्विति:**

**प्रश्न:-५ निम्नलिखितेषु सूत्रेषु द्वयो: सूत्रयो: सोदाहरणं व्याख्या कार्या | (१०)**

(१) उदात्तस्वरितयोर्यण: स्वरितोऽनुदात्तस्य |

(२) सुबामन्त्रिते पराङ्गवत्स्वरे |

(३) अनुदात्तस्य च यत्रोदात्तलोप: |

**प्रश्न:-६** "चौ" इति सूत्रं सोदाहरणं व्याख्यायताम् ? **(१०)**

**अथवा**

'सतिशिष्टस्वरबलियस्त्वमन्यत्र विकरणेभ्य:' इति परिभाषामुदाहरणप्रत्युदाहारणसहितञ्च व्याख्येया |

**प्रश्न:-७ केषामपि दशानां प्रश्नानाम् उत्तराणि लेख्यानि |** **(१०)**

(१) पदे कति स्वरा: उदात्ता: भवन्ति ?

(२) उदात्तात् परस्य अनुदात्तस्य क: स्वर: क्रियते ?

(३) सामान्यतया प्रत्ययस्य क: स्वर: उदात्त: भवति ?

(४) 'गृणीत:' इत्येतत् पदं स्वराजन् संयोज्य पुन: लिखत |

(५) आन्तर्यं कतिविधं भवति ?

(६) यत्र अनेकविधमान्तर्यं भवति तत्र कीदृशम् आन्तर्यं बलीय: भवति ?

(७) 'इको गुणवृद्धी' अत्र इक: इत्यत्र का विभक्ति: ?

(८) 'स्थानेयोगा' इत्यस्य समासस्य विग्रहं प्रदर्शयत |

(९) 'उपदेश' शब्दे क: प्रत्यय: ?

(१०) कालसमयवेलासु तुमुन् इति सूत्रं किं ज्ञापयति ?

(११) आभ्यन्तरयत्ना: पञ्च सन्ति इति मन्यते चेत् पाणिनिना विरचितं किं सूत्रमनावश्यकं भविष्यति ?

(१२) धातुसंज्ञा विधायकं सूत्रं लिखत |

(१३) कीदृशा: चादय: निपातसंज्ञका: भवन्ति ?

(१४) क्रियायोगे केषां उपसर्गसंज्ञा भवति ?

(१५) प्रतिज्ञाशब्दे कर्मणि अङ् केन सूत्रेण भवति ?